বিদ্যাসাগর বিশ্ববিদ্যালয়

# VIDYASAGAR UNIVERSITY

## Question Paper

## B.A. Honours Examination 2022

**(Under CBCS Pattern)**

## Semester - VI

## Subject: SANSKRIT

**Paper: DSE 4-T**

**Full Marks : 60**

**Time : 3 Hours**

*Candiates are required to give their answer in their own words as far as practicable.*
*The figures in the margin indicate full marks.*

Vidyasagar University

### Fundamentals of Ayurveda

1. अधोलिखितेषु यथेच्छं संस्कृतभाषया देवनागरीलिप्या च पूर्णवाक्येन **पञ्च**प्रश्नाः समाधेयाः — 2×5=10

(क) आयुर्वेदसाहित्यस्य मुख्यविभागद्वयं किमासीत्? कौ च तयोः प्रवर्तकौ?

(ख) चरकसंहितायाः प्रथमस्थानस्य अन्तिमस्थानस्य च नाम लिखत।

(ग) 'अष्टाङ्गसंग्रहः' — ग्रन्थस्य रचयिता कः? तस्मिन् ग्रन्थे कति स्थानानि सन्ति?

(घ) आचार्यचरकानुसारेण अयुर्वेदस्य प्रयोजनं किम्?

(ङ) **'दिवा शीतगृहे निद्रां निशि चन्द्रांशुशीतले'** — इत्यस्य कः कालः वर्णितः? तस्मिन् काले आहारे किञ्च वर्जनीयम्?

(च) 'हंसोदकम्' इत्यस्य कोऽर्थः?

(छ) उपनिषच्छब्दस्य कोऽर्थः?

(ज) **'अधीहि भगवो ब्रह्मेति'** — मन्त्रांशे कः कं प्रति किमुपससार?

2. अधोलिखितेषु यथेप्सितानां **चतुर्णां** प्रश्नानामुत्तरं प्रदेयम् (एकस्य प्रश्नस्य उत्तरमवश्यमेव सुरगिरा देवनागरीलिप्या च प्रदेयम्) — 5×4=20

(क) आयुर्वेदस्य अष्टौ अङ्गानि कानि सन्ति? शालाक्यतन्त्रस्य वैशिष्ट्यं समासेन उपस्थाप्यताम्।

(ख) कस्यापि **एकस्य** परिचयः प्रदेयः —

(i) पुनर्वसुः।

(ii) शार्ङ्गधरसंहिता

(ग) मानवीयसुस्वास्थ्यसंरक्षणे संयमे च हेमन्त-ऋतोः माहात्म्यमुपस्थाप्यताम्।

(घ) अधोलिखितेषु कस्यापि **एकस्य** टीका रचनीया —

(i) नागार्जुनः।

(ii) जीवकः।

(ङ) **'अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति'** — स्पष्टीक्रियताम्।

(च) **'प्राणो ब्रह्मेति व्यजानात्'** — कः कमभिलक्ष्य इदमुक्तवान्? 'प्राणो ब्रह्म' इत्यस्य तात्पर्यं समासेन व्याख्यायताम्।

3. अधोलिखितेषु यथेच्छं **त्रयाणां** प्रश्नानामुत्तरं प्रदेयम् — 10×3=30

(क) को नाम 'आयुः'? प्राचीनभारतीयसमाजे प्राक्-चरकचिकित्साव्यवस्था कीदृशी आसीदिति पाठ्यांशदिशा संक्षेपेणालोच्यताम्।

(ख) 'अष्टाङ्गहृदयम्' इति ग्रन्थस्य रचयिता कः? ग्रन्थस्य विषयादिवर्णनपूर्वकं संक्षेपेण विवरणं प्रदीयताम्।

(ग) **'तत्रादित्यस्योद्गमनमादानं च त्रीनृतून्'** — कस्मिन् प्रसङ्गे इयमुक्तिः? 'आदित्यस्य उदग्मनम्' इति पदेन कस्य निर्देशो चरकाचार्येण कृतः? तस्य वैशिष्ट्यं समासेन निरूपणं क्रियताम्।

(घ) प्रसङ्गेन सह व्याख्या कार्या —

(i) इत्युक्तमृतुसात्म्यं यच्चेष्टाहारव्यपाश्रयम्।
उपशेते यदौचित्यादोकः सात्म्यं तदुच्यते।।

(ii) अन्नं ब्रह्मेति व्यजनात्।

(ङ) तैतिरीयोपनिषदः भृगुवल्ल्याध्यायानुसारं ब्रह्मणः स्वरूपं वर्णयत।

Vidyasagar University

*Or,*

**Environmental Awerness in Sanskrit Literature**

अ. अधोलिखितेषु **पञ्च**प्रश्नानां समाधानं संस्कृतभाषया देवनागर्या विधेयम् — 2×5=10

१. परिवेश-शब्दस्य व्युत्पत्तिः का?

२. परिवेशस्य उपादानम् कतिविधम्?

३. वास्तुतन्त्रं किम्?

४. भारतीयवनभूमिनियमः कदा प्रारब्धः?

५. ''नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मास्मि'' परिवेशचेतनाविषयकः मन्त्रोऽयं कस्याम् उपनिषदि पठितः?

६. आर्सेनिक्-दूषणं किम्?

७. वायुदूषणस्य प्रतिकारोपायः कः?

८. नगरायणं किम्?

आ. अधोनिर्दिष्टेषु **चतुर्णां** टीका लेखनीया। 5×4=20

१. वास्तुसंस्थानम् (Ecology)

२. भूकम्पः (Earthquakes)

३. जलवायुपरिवर्तनम् (Climate Change)

४. वृक्षरोपणम् (Tree Plantation)

५. वन्यप्राणसंरक्षणम् (Protection of Wildlife Animals)

६. मेघदूतगीतिकाव्ये प्रकृतिः परिवेशश्च (Eco System in Meghdoot)

इ. अधोनिर्दिष्टेषु **त्रयाणां** प्रश्नानाम् उत्तरम् प्रदेयम्। 10×3=30

१. पर्यावरणं किम्? पर्यावरणस्य मूख्यउपादानविषये सम्यगालोच्यताम्।

२. यजुर्वेदसंहितायाम् प्रतिफलितः परिवेशचेतनाविषयः आलोच्यताम्।

३. रामायणस्य समये पक्षि-संरक्षणविषये यद् इङ्गितम् प्राप्नोति तदालोच्यताम्।

४. कालिदासरचिते रघुवंशमिति महाकाव्ये प्रतिफलिता परिवेशभावना वर्ण्यताम्।

५. वनसंरक्षणं विष्णुपुरानानुसारं सम्यगालोच्यताम्।

———————

Vidyasagar University